# .. brahmAnucintanam ..

## ॥ ब्रह्मानुचिन्तनम् ॥

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥ १॥
अहमेव परं ब्रह्म निश्चितं चित्त चिन्त्यताम् ।
चिद्रूपत्वादसङ्गत्वादबाध्यत्वात् प्रयत्नतः ॥ २॥
अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
इत्येवं समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ॥ ३॥
सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरन्तरम् ।
तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥ ४॥
अहं ब्रह्मास्मि यो वेद स सर्वं भवति त्विदम् ।
नाभूत्या ईशते देवास्तेओआमात्मा भवेद्धि सः ॥ ५॥
अन्यो असावहमन्यो अस्मीत्युपास्ते यो अन्यदेवताम् ।
न स वेद नरो ब्रह्म स देवानां यथा पशुः ॥ ६॥
अहमात्मा न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥ ७॥
आत्मानं सततं ब्रह्म संभाव्य विहरन्ति ये ।
न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ॥
आत्मानं सततं ब्रह्म संभाव्य विहरेत्सुखम् ॥ ८, ९॥
क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ।
तन्महापातकं हन्ति तमः सूर्योदयो यथा ॥ १०॥
अज्ञानाद्ब्रह्मणो जातमाकाशं बुद्बुदोपमम् ।
आकाशाद्वायुरुत्पन्नो वायोस्तेजस्ततः पयः ॥ ११॥
अद्भ्यश्च पृथिवी जाता ततो व्रीहियवादिकम् ।
पृथिव्यप्सु पयो वह्नौ वह्निर्वायौ नभस्यसौ ।
नभोऽप्यव्याकृते तच्च शुद्धे शुद्धोऽस्म्यहं हरिः ॥ १२॥
अहं विष्णुरहं विष्णुरहं विष्णुरहं हरिः ।
कर्तृभोक्त्रादिकं सर्वं तदविद्योत्थमेव च ॥ १३॥
अच्युतोऽहमनन्तोऽहं गोविन्दोऽहमहंहरिः ।
आनन्दोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ॥ १४॥
नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययः ।
सच्चिदानन्दरूपोऽहं पङ्चकोशातिगोऽस्म्यहम् ॥ १५॥
अकर्ताऽहमभोक्ताऽहमसङ्गः परमेश्वरः ।
सदा मत्सन्निधानेन चेष्टते सर्वमिन्द्रियं ॥ १६॥

आदिमध्यान्तमुक्तोऽहं न बद्धोऽहं कदाचन ।
स्वभावनिर्मलः शुद्धः स एवाहं न संशयः ॥ १७ ॥
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन्भावयितुं वाक्यमेतत्सदाऽभ्यसेत् ॥ १८ ॥
यदभ्यासेन तद्भावो भवेद्भ्रमरकीटवत् ।
अत्रापहाय सन्देहमभ्यसेत्कृतनिश्चयः ॥ १९ ॥
ध्यानयोगेन मासैकाद्ब्रह्महत्यां व्यपोहति ।
संवत्सरं सदाऽभ्यासात्सिद्ध्यष्टकमवाप्नुयात् ।
यावज्जीवं सदाऽभ्यासाज्जीवन्मुक्तो भवेद्यतिः ॥ २० ॥
नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च ।
न मनोऽहं न बुद्धिश्च नैव चित्तमहङ्कृतिः ॥ २१ ॥
नाहं पृथ्वी न सलिलं न च वह्निस्तथाऽनिलः ।
न चाकाशो न शब्दश्च न च स्पर्शस्तथा रसः ॥ २२ ॥
नाहं गन्धो न रूपं च न मायाऽहं न संसृतिः ।
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः ॥ २३ ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्मास्म्यहमद्वयम् ॥ २४ ॥
सर्वज्ञोऽहमनन्तोऽहं सर्वेशः सर्वशक्तिमान् ।
आनन्दः सत्यबोधोऽहमिति ब्रह्मानुचिन्तनम् ॥ २५ ॥
अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमव्ययम् ।
अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ॥ २६ ॥
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ।
नाहं देहो न मे देहः केवलोऽहं सनातनः ॥ २७ ॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं ब्रह्मानुचिन्तनं समाप्तं ॥

Encoded and proofread by Sorin Suciu aka SeSe at sorins at hotmail.com.

Please send corrections to sanskrit@cheerful.com
Last updated November 19, 2010
http://sanskritdocuments.org